CC-O. In Public Domain. Digitized by eGangotri



Sri Vidyabharathi Book Centre, Sringeri

दुर्गाकवचम्

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

देवीपुराणान्तर्वर्ति

दुर्गाकवचम्

श्री दुर्गास्तोत्र ★ अर्गलास्तोत्रम् ★ किलकस्तोत्रम् ★
देव्यपराधक्षमापनस्तोत्रम् ★ सिद्धकुञ्जिकास्तोत्रम्

Sri Vidyabharathi Book Centre, Sringeri

मूल्य : पाच रुपये

CC-0. In Public Domain. Digitized by eGangotri

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥
सर्व मंगल माङल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥

आवृत्ती : २००४

प्रकाशक :
मो. द. नांदुरकर
अनमोल प्रकाशन,
६८३, बुधवार पेठ,
पुणे २.

मुद्रक :
नरेंद्र मा. नांदुरकर
अनमोल पेपर कन्व्हर्टिंग
प्लॉ. नं. गट क्र. ५६२
ता. भोर, जिल्हा - पुणे.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दुर्गाकवचम्

श्रीगणेशाय नमः ॥ अस्य श्रीदेवीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छंदः, चामुण्डा देवता, अंगन्यासोक्तमातरो बीजं, दिग्बधंदेवतास्तत्त्वं, श्रीजगदंबाप्रीत्यर्थे जपे विनियोगः ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ नमश्चण्डिकायै । ॐ मार्कण्डेय उवाच ॥
यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् । यन्न
कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥
ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोप-
कारकम् । देव्यास्तु कवचं पुण्यं तच्छृणुष्व
महामुने ॥२॥ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्म-
चारिणी । तृतीयं चन्द्रघण्टेति कूष्माण्डेति
चतुर्थकम् ॥३॥ पञ्चमं स्कन्दमातेति षष्ठं

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कात्याय नीति च । सप्तमं कालरात्रिश्च महा-
गौरीति चाष्टमम् ॥४॥ नवमं सिद्धिदात्री च
नवदुर्गाः प्रकीर्तिताः। उक्तान्येतानि नामानि
ब्रह्मणैव महात्मना ॥५॥ अग्निना दह्यमानस्तु
शत्रुमध्ये गतो रणे । विषमे दुर्गमे चैव भयार्ताः
शरणं गताः ॥६॥ न तेषां जायते किंचिदशुभं
रणसंकटे । नापदं तस्य पश्यामि शोकदुःखभयं
नहि ॥७॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रजायते। (ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः।)
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥८॥
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना।
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥९॥
(लक्ष्मी पद्मासना देवी पद्महस्ता हरिप्रिया। श्वेतरूपधरा देवी
ईश्वरी वृषवाहना ॥) ब्राह्मी हंससमारूढा सर्वाभरण-
भूषिता। (इत्येता मातरः सर्वाः सर्वयोगसमन्विता:) नाना
Sri Vidyabharathi Book Centre, Sringeri
भरणशोभाढ्या नानारत्नोपशोभिताः ॥१०॥

CC-O. In Public Domain. Digitized by eGangotri

दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ।
शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥११॥
खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥१२॥
दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१३॥
(नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे) महाबले
महोत्साहे महाभयविनाशिनि । त्राहि मां देवि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥१४॥ प्राच्यां
रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता । दक्षिणेऽवतु
वाराही नैर्ऋत्यां खड्गधारिणी ॥१५॥ प्रतीच्यां
वारुणी रक्षेद्वायव्यां मृगवाहिनी । उदीच्यां
रक्ष कौबेरि ईशान्यां शूलधारिणी ॥१६॥ ऊर्ध्वं
ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा । एवं दश
दिशो रक्षेच्चामुण्डा शववाहना ॥१७॥ जया मे
अग्रतः स्थातु विजया स्थातु पृष्ठतः। अजिता

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वामपार्श्वे तु दक्षिणे चापराजिता ॥१८॥ शिखां
मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ।
मालाधरी ललाटे च भ्रुवौ रक्षेद्यशास्विनी ॥१९॥
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ।
शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी
॥२०॥ कपोलौ कालिका रक्षेत् कर्णमूले तु
शांकरी । नासिकायां सुगन्धा च उत्तरोष्ठे च
चर्चिका ॥२१॥ अधरे चामृतकला जिह्वायां च

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरस्वती । दन्तान् रक्षतु कौमारी कण्ठमध्ये तु चण्डिका ॥२२॥ घण्टिकां चित्रघण्टा च महामाया च तालुके । कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला ॥२३॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी । नीलग्रीवा बहिःकण्ठे नलिका नलकूबरी ॥२४॥ खड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधारिणी हस्तयोर्दण्डिनी रक्षेदम्बिका चांगुलीस्तथा ॥२५॥ नखाञ्छूलेश्वरी रक्षेत् कुक्षौ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रक्षेन्नलेश्वरी । स्तनौ रक्षेन्महालक्ष्मीर्मनःशोक-
विनाशिनी ॥२६॥ हृदयं ललितादेवी उदरं
शूलधारिणी । नाभौ च कामिनी रक्षेद्गुह्यं
गुह्येश्वरी तथा॥२७॥ कट्यां भगवती रक्षेज्जानुनी
विन्ध्यवासिनी । भूतनाथा च मेढ्रं मे उरू
महिषवाहिनी ॥२८॥ जंघे महाबला प्रोक्ता
सर्वकामप्रदायिनी । गुल्फयोर्नारसिंही च पादौ
चामिततेजसी ॥२९॥ पादांगुलीः श्रीर्मे रक्षेत्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पादाधस्तलवासिनी । नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥३०॥ रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा । रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती॥३१॥ अंत्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी । पद्मावती पद्मकोशे कफे चूडामणिस्तथा॥३२॥ ज्वालामुखी नखज्वाला अभेद्या सर्वसंधिषु । शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥३३॥ अहंकारं मनो बुद्धिं रक्ष मे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्मचारिणि । प्राणापानौ तथा व्यानं समानो-
दानमेव च ॥३४॥ (वज्रहस्ता च मे रक्षेत्प्राणकल्पं च
शोभना । रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी ॥
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा । आयू रक्षतु वाराही
धर्मं रक्षतु वैष्णवी ॥) यशः कीर्तिं च लक्ष्मीं च सदा
रक्षतु वैष्णवी । गोत्रमिन्द्राणी मे रक्षेत् पशून्मे
रक्ष चण्डिके ॥३५॥ पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां
रक्षतु भैरवी । मार्गं क्षेमकरी रक्षेद्विजया सर्वतः
स्थिता ॥३६॥ रक्षाहीनं तु यत्स्थानं वर्जितं

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कवचेन तु । तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥३७॥ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः । कवचेनावृतो नित्यं यत्र यत्राधिगच्छति ॥३८॥ तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः। यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥३९॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् । निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥४०॥ त्रैलोक्ये तु भवेत् पूज्यः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कवचेनावृतः पुमान् । इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥४१॥ यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः । दैवी कला भवेत्तस्य त्रैलोक्येऽप्यपराजितः ॥४२॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः। नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥४३॥ स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषम् । आभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले ॥४४॥ भूचराः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

खेचराश्चैव जलजाश्चोपदेशिकाः । सहजाः
कुलजा मालाः शाकिनी डाकिनी तथा ॥४५॥
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ।
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥४६॥
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते॥४७॥
मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् । यशसा
वर्धते सोऽपि कीर्तिमण्डितभूतले ॥४८॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ।
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥४९॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥५०॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।

वाराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीगणेशायनमः । श्रीदुर्गायै नमः ॥

नगरांत प्रवेशले पंडुनंदन । तों देखिले दुर्गास्थान । धर्मराज करी स्तवन । जगदंबेचे तेघवां ॥१॥ जय जय दुर्गे भुवनेश्वरी । यशोदागर्भसंभवकुमारी ॥ इंदिरारमणसहोदरी । नारायणी चंडिकेंबिके ॥२॥ जय जय जगदंबे विश्वकुटुंबिनी । मूलस्फूर्ति प्रणवरूपिणी । ब्रह्मानंदपददायिनी चिद्विलासिनी अंबिके तू ॥३॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जय जय धराधरकुमारी । सौभाग्यगंगे त्रिपुर-
सुन्दरी । हेरंबजननी अंतरी । प्रवेशी तू
आमुचे ॥४॥ भक्तहृदयारविंदभ्रमरी । तुझे
कृपाबळे निर्धारी । अतिमूढ निगमार्थ विवरी ।
काव्यरचना करी अद्भुत ॥५॥ तुझियें कृपा-
वलोकनें करून । गर्भांधासी येतील नयन ।
पांगुळ करील गमन । दूर पंथे जाऊनी ॥६॥
जन्मादारभ्य जो मुका । होय वाचस्पतिसमान

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

बोलका । तू स्वानंदसरोवरमराळिका । होसी भाविका सुप्रसन्न ॥७॥ ब्रह्मानंदे आदिजननी । तव कृपेची नौका करूनी । दुस्तर भवसिंधू उल्लंघूनी । निवृत्तितटा जाईजे ॥८॥ जय जय आदिकुमारिके । जय जय मूळपीठनायके । सकल-सौभाग्यदायिके । जगदंबिके मूलप्रकृतिके ॥९॥ जय जय भार्गवप्रिये भवानी । भयनाशके भक्तवरदायिनी । सुभद्रकारिके हिमनगनंदिनी ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

त्रिपुरसुंदरी महामाये ॥१०॥ जय जय आनंद-
कासारमराळिके । पद्मनयने दुरितवनपावके ।
त्रिविधताप भावमोचके। सर्वव्यापके मृडानी ॥११॥
शिवमानसकनकलतिके। जय चातुर्यचंपककलिके।
शुंभनिशुंभदैत्यांतके । निजजनपालके
अपर्णे ॥१२॥ तव मुखकमलशोभा देखोनी ।
इंदुबिंब गेले विरोनी । ब्रह्मादिदेव बाळे
तान्ही । स्वानंदसदनी निजवासी ॥१३॥ जीव

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शिव दोन्ही बाळके। अंबे त्वां निर्मिली कौतुके। स्वरूप तुझे जीव नोळखे। म्हणोनी पडिला आवर्ती ॥१४॥ शिव तुझे स्मरणी सावचित्त। स्वानंदपद हाता येत। तुझे कृपेनें म्हणोनी तो नित्यमुक्त जननीयें ॥१५॥ मेळवूनि पंचभूतांचा मेळ। त्वां रचिलाब्रह्मांडगोल। इच्छा परत-तांतत्काळ। क्षणे निर्मूळ करिसी तूं ॥१६॥ अनंत बालादित्य श्रेणी। तव प्रभेमाजी गेल्या

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लपोनी। सकलसौभाग्यशुभकल्याणी। रमारमण-
वरप्रदे ॥१७॥ जयशंबरारिपुहरवल्लभे । त्रैलोक्य-
नगरारंभस्तंभे आदिमाये आत्मप्रभे। सकलारंभे
मूलप्रकृति ॥१८॥ जय करुणामृतसरिते।
भक्तपालके गुण भरिते। अनंतब्रह्मांडफलांकिते।
आदिमाये अन्नपूर्णे ॥१९॥ तू सच्चिदानंदप्रणव-
रूपिणी। सकलचराचरव्यापिनी । सर्गस्थित्यंत-
कारिणी। भवमोचनी ब्रह्मानंदे ॥२०॥ ऐकोनि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्मांचे स्तवन। दुर्गा जाहली प्रसन्न। म्हणे तुमचे शत्रू संहारीन। राज्यी स्थापीन धर्मातें ॥२१॥ तुम्ही वास करा येथ। प्रगटो नेदी जनांत। शत्रू क्षय पावती समस्त। सुख अद्भुत तुम्हां होय ॥२२॥ त्वां जे स्तोत्र केले पूर्ण। ते जे त्रिकाल करिती पठण। त्यांचे सर्व काम पुरवीन। सदा रक्षीन अंतर्बाह्य ॥२३॥

Sri Vidyabharathi Book Centre, Sringeri

इति श्रीयुधिष्ठिरविरचितं दुर्गास्तोत्रं समाप्तम्

CC-O. In Public Domain. Digitized by eGangotri

॥ अथार्गलास्तोत्रम् ॥

श्रीगणेशाय नमः ॥ अस्य श्रीअर्गलास्तोत्र-मंत्रस्य विष्णुर्ऋषिः, अनुष्टुप्छंदः, श्रीमहालक्ष्मी-दैवता, श्रीजगदंबाप्रीतये जपे विनियोगः ॥ ॐ नमश्चण्डिकायै । जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥१॥ मधुकैटभविद्रावि विधातृवरदे नमः । रूपं देहि जयं देहि यशो

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

देहि द्विषो जहि ॥२॥ महिषासुरनिर्नाशविधात्रि वरदे नमः । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥३॥ वन्दितांघ्रियुगे देवि सर्व-सौभाग्यदायिनि । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥ रक्तबीजवधे देवि चंडमुंड-विनाशिनि । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥५॥ अचिन्त्यरूपचरिते सर्वशत्रु-विनाशिनि । रूपं देहि जयं देहि यशो देहि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्विषो जहि ॥६॥ नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥७॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥८॥ चण्डिके सततं ये त्वामर्चयंतीह भक्तितः। रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम्। रूपं देहि जयं

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

देहि यशो देहि द्विषो जहि ॥१०॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥११॥ विधेहि देवि कल्याणं विधेहि परमां श्रियम् । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१२॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु । रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१३॥ प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रूपं देहि जयं देहि यशो देहि द्विषो जहि
॥१४॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि । रूपं
देहि जयं देहि यशो देहि द्विषो जहि ॥१५॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥
हिमाचलसुतानाथसंस्तुते परमेश्वरि । रूपं
देहि जयं देहि यशो देहि द्विषो जहि ॥१७॥
Sri Vidyabharathi Book Centre, Sringeri
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके । रूपं देहि

CC-O. In Public Domain. Digitized by eGangotri

जयं देहि यशो देहि द्विषो जहि ॥१८॥ इन्द्राणी-
पतिसद्भावपूजिते परमेश्वरि। रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥१९॥ देवि भक्तजनो-
द्दामदत्तानन्दोदयेऽम्बिके । रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥२०॥ पुत्रान्देहि धनं
देहि सर्वकामांश्च देहि मे । रूपं देहि जयं देहि
यशो देहि द्विषो जहि ॥२१॥ पत्नीं मनोरमां
देहि मनोवृत्तानुसारिणीम् । तारिणीं दुर्गसंसार-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सागरस्य कुलोद्भवाम्॥२२॥ इदं स्तोत्रं पाठित्वा तु महास्तोत्रं पठेन्नरः। स तु सप्तशतीसंख्या-वरमाप्नोति सम्पदाम् ॥२३॥

मार्कण्डेयपुराणे अर्गलास्तोत्रम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ भगवत्याः कीलकस्तोत्रम् ॥

श्रीगणेशाय नमः ॥ अस्य श्रीकीलकस्तोत्र-
मंत्रस्य शिवऋषिः, अनुष्टुप्छंदः, श्रीमहा-
सरस्वती देवता, श्रीजगदंबाप्रीत्यर्थं जपे विनि-
योगः ॥ ॐ नमश्चण्डिकायै । ॐ मार्कण्डेय
उवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां नित्यं स्तोत्रमात्रेण सिद्ध्यति ॥३॥
न मन्त्रो नौषधं तत्र न किंचिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥४॥
समग्राण्यपि सिद्ध्यंति लोकशंकामिमां हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार
सः । समाप्तिर्न च पुण्यस्य तां यथावन्नि-
यन्त्रणाम् ॥६॥ सोऽपि क्षेममवाप्नोति सर्वमेव
न संशयः । कृष्णायां वा चतुर्दश्यामष्टम्यां वा
समाहितः ॥७॥ ददाति प्रतिगृह्णाति नान्यथैषा
प्रसीदति । इत्थंरूपेण कीलेन महादेवेन
कीलितम् ॥८॥ यो निष्कीलां विधायैनां नित्यं
जपति सुस्फुटम् । सासिद्धः सगणः सोऽपि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गन्धर्वो जायते वने ॥९॥ न चैवाप्यटतस्तस्य
भयं कापि हि जायते । नापमृत्युवशं याति
मृतो मोक्षमवाप्नुयात् ॥१०॥ ज्ञात्वा प्रारभ्य
कुर्वीत ह्यकुर्वाणो विनश्यति । ततो ज्ञात्वैव
सम्पन्नमिदं प्रारभ्यते बुधैः॥११॥ सौभाग्यादि च
यत्किंचिद्दृश्यते ललनाजने । तत्सर्वं तत्प्रसादेन
तेन जाप्यमिदं शुभम् ॥१२॥ शनैस्तु जप्यमानेऽ-
स्मिन्स्तोत्रे सम्पत्तिरुच्चकैः । भवत्येव समग्रापि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ततः पारम्यमेव तत् ॥१३॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः। शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥१४॥

भगवत्याः कीलकस्तोत्रम् ॥

प्रार्थना

यदक्षरं पद भ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

Sri Vidyabharathi Book Centre, Sringeri

॥ अथ कुञ्जिकास्तोत्रम् ॥

CC-O. In Public Domain. Digitized by eGangotri

शिव उवाच

श्रृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥ १ ॥

न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम्
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥ २ ॥

कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥ ३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ।
पाठमात्रेण ससिद्धचेत् कुञ्जिकास्तोत्रमुत्तमम् ।। ४ ।।

अथ मन्त्रः

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ।। ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुडायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ।। इति मन्त्रः ।।

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनी ।। १ ।।
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि
जाग्रतं हि महादेवि जापं सिद्धं कुरुष्व मे । ।। २ ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते ॥ ३ ॥

चामुण्डा चण्डघाती च यैंकारी वरदायिनी
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ॥ ४ ॥

धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी ।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभंकुरु ॥ ५ ॥

हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ॥ ६ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं ।
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरुकुरु स्वाहा ॥ ७ ॥
पां पीं पूं पार्वती पूर्णा खां खीं खुं खेचरी तथा ।
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे ॥ ८ ॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥
यस्तु कुञ्जिकयादेवि हीनां सप्तशतीं पठेत ।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ॥
इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं संपूर्णम् ।
॥ ॐ तत्सत् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीदेव्यपराधक्षमापनस्तोत्रम् ।

।। श्रीगणेशाय नमः ।। न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो। न चाव्हानं ध्यानं तदपि च न जाने स्तुतिकथाः। न जाने मुद्रास्ते तदपि च न जाने विलपनं। परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ।।१।। विधेरज्ञानेन द्रविणविरहेणालसतया। विधेयाशक्यत्वात्तव चरणयोर्याच्युतिरभूत्। तदेतत्क्षन्तव्यं जननि सकलोद्धारिणी शिवे। कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।२।। पृथिव्यां पुत्रास्ते जननि वहवः सन्ति सरलाः। परं तेषां मध्ये विरलतरलोऽहं तव सुतः। मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे। कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।३।। जगन्मातर्मातस्तव चरणसेवा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न रचिता । न वा दत्तं देवि द्रविणमपि भूयस्तव मया । तथापि त्वं स्नेह मयि निरुपमं यत्प्रकुरुषे । कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥ परित्यक्त्वा देवान्विविधविधसेवाकुलतया । मया पञ्चाशीतेरधिकमपनीते तु वयसि । इदानीं चेन्मातस्तव यदि कृपा नापि भविता । निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥ श्वपाको जल्पाको भवति मधुपाकोपमगिरा । निरातङ्को रङ्को विहरति चिरं कोटिकनकैः । तवापर्णे कर्णे विशति मनुवर्णे फलमिदं । जनः को जानीते जननि जपनीय जपविधौ ॥६॥ चिताभस्मालेपो गरलमशनं दिक्पटधरो । जटाधारी कण्ठे भुजगपतिहारी पशुपतिः । कपाली भूतेशो भजति जगदीशैकपदवीं । भवानि त्वत्पाणिग्रहण-परिपाटीफलमिदम् ॥७॥ न मोक्षस्याकांङ्क्षा भवविभववाञ्छापि

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

च न मे । न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः । अतस्त्वां संयाचे जननि जनन यातु मम वै । मृडानी रुद्राणि शिवशिव भवानीति जपतः ॥८॥ नाराधितासि विधिना विविधोपचारैः किं रुक्ष चिन्तनपरैर्न कृतं वचोभिः । श्यामे त्वमेव यदि किञ्चन मय्यनाथे धत्से कृपामुचितमम्ब परं तवैव ॥९॥ आपत्सु मग्नः स्मरणं-त्वदीयं । करोमि दुर्गे करुणार्णवेशि । नैतच्छठत्वं मम भावयेथाः । क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥ जगदम्ब विचित्रमत्र किं परिपूर्णा करुणाऽस्ति चेन्मयि । अपराधपरम्परापरं न हि माता समुपेक्षते सुतम् ॥११॥ मत्समः पातकी नास्ति पापघ्नी त्वत्समा नहि । एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं संपूर्णं ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्षमाप्रार्थना

अपराधसहस्राणि क्रियतेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥२॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मयादेवि परिपूर्णं तदस्तु मे ॥३॥

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
Sri Vidyabharathi Book Centre, Sringeri
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥४॥

CC-O. In Public Domain. Digitized by eGangotri

सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥५॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥६॥

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥७॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥८॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ श्रीमहालक्ष्म्यष्टकस्तवः ।

श्रीगणेशाय नमः ॥ इंद्र उवाच ॥ नमस्तेऽतु महामाये
श्रीपीठे सूरपूजिते । शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु
ते ॥१॥ नमस्ते गरुडारूढे कोलासुरभयंकरि । सर्वपापहरे
देवि महालक्ष्मि नमो० ॥२॥ सर्वज्ञे सर्ववरदे सर्वदुष्ट-
भयंकरि । सर्वदुःखहरे देवि महालक्ष्मि नमो० ॥३॥
सिद्धीबुद्धीप्रदे देवि भुक्तिमुक्तिप्रदायिनि । मंत्रमूर्ते सदा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

देवि महालक्ष्मि नमो० ॥४॥ आद्यंतरहिते देवी आद्यशक्ति महेश्वरि। योगजे योग्यसंभूते महालक्ष्मि नमो० ॥५॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ते महोदरे। महापापहरे देवि महालक्ष्मि नमो० ॥६॥ पद्मासनस्थिते देवि परब्रह्म-स्वरूपिणि। परमेशि जगन्मातर्महालक्ष्मि नमो० ॥७॥ श्वेतांबरधरे देवि नानालंकारभूषिते। जगत्स्थिते जगन्मातर्महालक्ष्मि नमो० ॥८॥ महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः। सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९॥ एककालं पठेन्नित्यं महापाप-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विनाशनम् द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः
॥१०॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११॥

॥ इति इंद्रकृतः श्रीमहालक्ष्म्यष्टकस्तवः संपूर्णः ॥

—

Sri Vidyabharathi Book Centre, Sringeri

॥ श्री देवीची आरती ॥

CC-O. In Public Domain. Digitized by eGangotri

दुर्ग दुर्घट भारी तुजविण संसारी । अनाथनाथे अंबे करुणा विस्तारी । वारी वारी जन्ममरणासे वारी हारी पडलों आतां संकट निवारी ॥ धृ० ॥ जय देवी जय देवी जय महिषासुरमथिनी । सुरवर ईश्वरवरदे तारक संजीवनी ॥ १ ॥ त्रिभुवन भुवनी पाहतां तुजऐसी नाहीं । चारी श्रमले परंतु न बोलवे कांहीं । साहीं विवाद करिता पडलो प्रवाहीं । ते तूं भक्तांलागी पावसि लवलाही ॥ जय० ॥२॥ प्रसन्नवदने प्रसन्न होसी निजदासां । क्लेशांपासूनी सोडवीं तोडी भवपाशा अंबे तुजवांचुन कोण पुरविल आशा । नरहरि तल्लीन झाला पदपंकजलेशा । जय देवी जय देवी जय महिषासुरमथिनी । सुरवर ईश्वरवरदे तारक संजीवनी ॥३॥ ▫

Sri Vidyabharathi Book Centre, Sringeri

● आमची धार्मिक प्रकाशने ●

CC-O. In Public Domain. Digitized by eGangotri

- रुद्रार्थ दीपिका :- श्रीपादशास्त्री किंजवडेकर
- श्री शिवलिलामृत अध्याय ११वा
- श्री शिवमहिम्न स्तोत्र (मराठी)
- सार्थ श्री शिवमहिम्नस्तोत्रम् (संस्कृत)
- श्री शिवअपमार्जन स्तोत्र
- श्री शिवस्तुती
- श्री शिवतांडव स्तोत्र
- अथ रुद्रस्वाहाकार
- श्री मृत्युहरण स्तोत्र
- श्री शिवसहस्त्र नामावली
- बारा ज्योतिर्लिंगाच्या गोष्टी
- श्री शिवमंगलागौरी पूजा आणि कथा
- रुद्राध्याय: (स्वरयुक्त नमक चमक समलंकृत)
- अथ नमक-चमकात्मको रुद्राध्याय:
- पंचदेव उपासना
- पूजा विधान
- सर्व देवपूजा

अनमोल प्रकाशन, अप्पा बळवंत चौक, पुणे - २.

Sri Vidyabharathi Book Centre, Sringeri